## मड्डुकझर्झरादणन्यतरस्याम्। (५६/१६०६)

मड्डुकझर्झरशब्दाभ्यामन्यतरस्याम् अण् प्रत्ययो भवति तदस्य शिल्पम् इत्येतस्मिन्[1]विषये । ठकोऽपवादः। पक्षे सोऽपि भवति। मड्डुकवादनं शिल्पमस्य माड्डुकः, माड्डुकिकः । झार्झरः, झार्झरिकः ॥

## प्रहरणम्। (५७/१६०७)

तदस्य इत्येव। तद् इति प्रथमासमर्थाद् अस्य इति षष्ठ्यर्थे ठक् प्रत्ययो भवति, यत्तत् प्रथमासमर्थं प्रहरणं चेत् तद्भवति। असिः प्रहरणमस्य आसिकः। [2]प्रासिकः। [3]चाक्रिकः। धानुष्कः ॥

## परश्वधाद् ठञ् च। (५८/१६०८)

परश्वधशब्दात् ठञ् प्रत्ययो भवति[4], चकारात् ठक्। स्वरे विशेषः। परश्वधः प्रहरणमस्य पारश्वधिकः[5] ॥

## शक्तियष्ट्योरीकक्। (५९/१६०९)

शक्तियष्टिशब्दाभ्याम् ईकक् प्रत्ययो भवति तदस्य प्रहरणम् इत्येतस्मिन् [6]विषये। ठकोऽपवादः। शक्तिः प्रहरणमस्य शाक्तीकः। याष्टीकः[7] ॥

## अस्तिनास्तिदिष्टं मतिः। (६०/१६१०)

तदस्य इत्येव। तदिति प्रथमासमर्थेभ्यः अस्ति नास्ति दिष्ट [8]इत्येतेभ्यः शब्देभ्यः अस्य इति षष्ठ्यर्थे ठक् प्रत्ययो भवति [9]यत् तत् प्रथमासमर्थं मतिश्चेत् [10]तद्भवति। अस्ति मतिः अस्य आस्तिकः। नास्ति मतिः अस्य नास्तिकः। [11]दैष्टिकः। न च मतिसत्तामात्रे प्रत्यय इष्यते, किं तर्हि, परलोकोऽस्ति इति यस्य मतिः स आस्तिकः। [12]तद्विपरीतो नास्तिकः। प्रमाणानुपातिनी यस्य मतिः स दैष्टिकः। तदेतदभिधान[13]शक्तिस्वभावाल्लभ्यते। अस्तिनास्तिशब्दौ [14]निपातौ, वचनसामर्थ्याद्वा आख्याताद् वाक्याच्च प्रत्ययः ॥

## शीलम्। (६१/१६११)

तदस्य इत्येव। तद् इति प्रथमासमर्थादस्य इति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत् प्रथमासमर्थं शीलं चेद् तद्भवति। [15]शीलं स्वभावः। अपूपभक्षणं शीलमस्य आपूपिकः। [16]शाष्कुलिकः। मौदकिकः। भक्षणक्रिया [17]तद्विशेषणं च [18]शीलं तद्धितवृत्तावन्तर्भवति ॥

---

1. अर्थे फ.ह. 2. नास्ति फ. 3. चार्मिकः ह. 4. तत्प्रहरणमस्य इत्येतस्मिन्नर्थे क.फ.ह. 5. पारश्वधिकी इत्यधिकम् ह. 6. अर्थे फ.ह. 7. याष्टीकी इत्यधिकम् ब. 8. एतेभ्यः नास्ति क. फ. 9. यत् तत् प्रथमासमर्थं नास्ति फ. 10. सा ब.क.ड. 11. दिष्टमित्यस्य मतिः इत्यधिकम् क. 12. तद्विपरीतो नास्तिकः नास्ति ह. 13. शक्ति-स्वाभाव्यात् फ. ह. 14. निपातितौ फ. 15. शीलं स्वभावः नास्ति फ, शीलं चेतः ड. 16. नास्ति ब. ड. 17. तद्विषयं च ब. ड. ह. 18. शीलं नास्ति फ.